CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 272

Title Saptarṣi pūjanādi-karma

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 292 Subject : Śrauta Ritual

Title : Saptarṣi pūjanādikarma.

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10.2" by 4.5. Extent : 21 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : —

...मृद्दर्भतिलपुष्पाणि दूर्वापामार्गगोमयं ।। शिरःशौचं धौतपात्रीपा
...म...णायच ।। एकांतमुदकं गत्वा तटं प्रक्षाल्य पाणिना ।। संभारान्स्थापयेत्तत्र यथा
...पकपूर्वकं ।। प्रक्षाल्य पाणिपादौ च विधिनाचमनं ततः ।। स्मृत्वा कृतांजलिर्विष्णुं ततः
...नितमांबरे ।। प्रक्षाल्य ब्रह्मसूत्रं च मृद्भिरद्भिः शनैः शनैः ।। आपादमस्तकं देहं तथैव
क्षालयेद्बुधः ।। अतिनीलघनमहाकायकल्पांतदहनोपम ।। भैरवाय नमस्तुभ्यमनुज्ञां दा
तुमर्हसि ।। इति भैरवप्रार्थना ।। शुनःशेपो वरुणस्त्रिष्टुप् ।। तत्वायामीति वरुणस्यावाहनं ।।
तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ।। अहेलमानो वरुणेह बोध्युरु
शंस मान आयुः प्रमोषीः ।। अगस्त्य इंद्रस्त्रिष्टुप् ।। अगस्त्यः खनमान इति मृत्तिकाखनने ।। अ

गस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।। उभौ वर्णावृषिरुग्रः पुपोष सत्या दे
वेष्वाशिषो जगाम ।। मधुच्छंदाः सरस्वती गायत्री ।। पावका नः सरस्वतीति तृचेन मृत्तिकाप्र...नं ।
पावका नः सरस्वती वाजेभिर्वाजिनीवती ।। यज्ञं वष्टु धियावसुः ।। चोदयित्री सूनृतानां चे
तंती सुमतीनां ।। यज्ञं दधे सरस्वती ।। महो अर्णः सरस्वती प्रचेतयति केतुना ।। धियो विश्वा वि
राजति ।। व्यासो मृत्तिकानुष्टुप् ।। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ।। मृत्तिके हर मे पापं
यन्मया दुष्कृतं संचितं ।। उद्धृतासि वराहेण कृष्णेन शतबाहुना ।। मृत्तिके हर मे पापं यद्दु
...तुषं ।। आभ्यां मृदेकया शिरः प्रक्षाल्य द्वाभ्यां नाभिं तथोपरि ।। जंघयोस्तिसृभिश्चैव
...दौ पंचभिः ।। नाभिर्लेपविशयनिमृज्य ।। विमदो वसुरुद्राग्निर्विराट् ।। भद्रं नो अ

मनइतित्रिर्जपित्वा।त्रिःपिबेत्।आग्नेय्यामत्रयंकुर्यात्।मेधातिथिर्द्यावापृथिवीगायत्री॥
महीद्यौःपृथिवीचनइतिमृत्तिकाग्रहणं।महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां।पिपृतां
नोभरीमभिः।हिरण्यस्तूपःसविताविष्टुप्।आकृष्णेनेत्यातपनं।आकृष्णेनरजसावर्त
मानोनिवेशयन्नमृतंमर्त्यंच।हिरण्ययेनसविताथेनादेवोयातिभुवनानिपश्यन्।मेधा
तिथिपृथिवीगायत्री।स्योनापृथिवीभवानृक्षरानिवेशनी।यच्छानःशर्मसप्रथः।शिरो
ललाटंबाहुहृदयेजंघेपादौपूर्ववत्लिंपेत्।व्यासोगोमयमनुष्टुप्।अग्रमग्रंचरंती
नामोषधीनांरसंवने।यन्मेरोगंचशोकंचतन्मेदहतुगोमयं।अग्रमग्रंचरंतीनांमो २
षधीनांरसंवने।तासांवृषभपत्नीनांपवित्रंकायशोधनं।कश्यपोरुद्रोजगती।मान

स्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः।वीरान्मानोरुद्रभामितोवधीर्ह
विष्मंतःसदमित्वाहवामहे।आनंदकर्दमचिक्लीतइंद्रसुताश्रीरनुष्टुप्।गंधद्वारांदुराधर्षां
नित्यपुष्टांकरीषिणीं।ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं।मृत्तिकावद्गोमयेन।अग्निर्दूर्वा
नुष्टुप्।कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि।एवानोदूर्वेप्रतनुसहस्रेणशतेनच।या
शतेनप्रतनोषिसहस्रेणविरोहसि।तस्यास्तेदेवीष्टकेविधेमहविषावयं।आभ्यांदूर्वांकु
रैर्मार्जनं।वामदेवोलिंगोक्तानुष्टुप्।अपाघमपकिल्बिषमपकृत्यामपोरपः।अपामार्गत्व
मस्मदपदुष्वप्न्यंसुव।इतिदूर्वांत्।मधुच्छंदाःसरस्वतीगायत्री।पावकानःसरस्वतीवाजेभि
र्वाजिनीवती।यज्ञंवष्टुधियावसुः।चोदयित्रीसूनृतानांचेतंतीसुमतीनां।यज्ञंदधेसरस्वती॥

॰ अर्णः सरस्वती प्रचेतयति केतुना। धियो विश्वा विराजति॥ ऋ कुश्मार्जनामंत्राणि सि-
रापो गायत्री पंचम्यानुष्टुभो। अंबयो यंत्यध्वभिर्जामयो अध्वरीयतां। पृंचतीर्मधुना पयः।
अमूर्या उपसूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वंत्वध्वरं। अपो देवीरुपह्वये यत्र गावः पिबंति
नः। सिंधुभ्यः कर्त्वं हविः। अप्स्वं१ंतरमृतमप्सु भेषजमपामुत प्रशस्तये। देवा भवत वाजि-
नः॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा। अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः।
॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक् च सूर्यं दृशे। इदमापः प्रवहत यत्किंच दुरि-
तं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं। आपो अद्यान्वचारिषं रसेन समगस्महि। प-
यस्वानग्न आगहि तं मा संसृज वर्चसा। सं माग्ने वर्चसा सृज सं प्रजया समायुषा। विद्युर्मे अ-

स्य देवा इंद्रो विद्यात्सह ऋषिभिः॥२॥ कुत्सो अग्निः शुचिर्गायत्री। अप नः शोशुचदघमग्ने शु-
शुग्ध्या रयिं। अप नः शोशुचदघं। सुक्षेत्रिया सुगातुया वसूया च यजामहे। अप॰ घं॥ प्र य-
द्भंदिष्ठ एषां प्रास्माकासश्च सूरयः। अप॰ घं। प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं। अप॰ घं।
प्र यदग्नेः सहस्वतो विश्वतो यंति भानवः। अप॰ घं। त्वं हि विश्वतोमुख विश्वतः परिभूरसि।
अप॰ घं। द्विषो नो विश्वतोमुखाति नावेव पारय। अप॰ घं। स नः सिंधुमिव नावयाति पर्षा
स्वस्तये। अप॰ घं॥३॥ गृत्समदः सरस्वत्यनुष्टुब्बृहती। अंबितमे नदीतमे देवितमे सरस्व-
ति। अप्रशस्ता इव स्मसि प्रशस्तिमंब नस्कृधि। त्वे विश्वा सरस्वति श्रितायूंषि देव्यां। शुनहो-
त्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः। इमा ब्रह्म सरस्वति जुषस्व वाजिनीवती। या ते मन्म गृत्स-

महास्तनावरिप्रियादेवेषुनुकृनि।प्रेनांयज्ञस्यशंभुवायुवामिदावृणीमहे।अग्निंचह
व्यवाहनं।द्यावानःपृथिवीइमंसिध्रमद्यदिविस्पृशं।यज्ञंदेवेषुयछतां।आवामुपस्थ
मद्रुहादेवाःसीदंतुयज्ञियाः।इहाद्यसोमपीतये॥४॥प्रपर्वतानांसम्भोनासंवादोनदी
भिर्विश्वामित्रस्योत्तीतीर्षोस्तत्रनदीवाक्यंचतुर्थीऋषष्ठ्यष्टमीदशम्यःषष्ठीसप्तम्योस्त्विंद्र
स्कृतिरंत्यानुष्टुप्।प्रपर्वतानामुशतीउपस्थादश्वेइवविषितेहासमाने।गावेवशुभ्रेमा
तरारिहाणेविपाट्छुतुद्रीपयसाजवेने।इंद्रेषितेप्रसवंभिक्षमाणेअछासमुद्रंरथ्येव
याथः।समाराणेऊर्मिभिःपिन्वमानेअन्यावामन्यामप्येतिशुभ्रे।अछासिंधुंमातृतमाम ४
यासंविपाशमुर्वींसुभगामगन्म।वत्समिवमातरासंरिहाणेसमानंयोनिमनुसंचरंती॥

एनावयंपयसापिन्वमानाअनुयोनिंदेवकृतंचरंतीः।नवर्तवेप्रसवःसर्गतक्तःकिंयु
र्विप्रोनद्योजोहवीति।रमध्वंमेवचसेसोम्यायऋतावरीरुपमुहूर्तमेवैः।प्रसिंधुमछाबृ
हतीमनीषावस्युरह्वेकुशिकस्यसूनुः॥५॥इंद्रोअस्माँअरदद्वज्रबाहुरपाहन्वृत्रंप
रिधिंनदीनां।देवोनयत्सवितासुपाणिस्तस्यवयंप्रसवेयामउर्वीः।प्रवाच्यंशश्वधावीर्यं
तदिंद्रस्यकर्मयदहिंविवृश्चत्।विवज्रेणपरिषदोजघानायन्नापोयनमिछमानाः।एत
द्वचोजरितर्मापिमृष्ठाआयत्तेघोषानुत्तरायुगानि।उक्थेषुकारोप्रतिनोजुषस्वमानोनि
कःपुरुषत्रानमस्ते।ओषुस्वसारःकारवेशृणोतययौवोदूरादनसारथेन।निषूनमध्वं
भवतासुपाराअधोअक्षाःसिंधवःस्रोत्याभिः।आनेकारोशृणवामावचांसिययाथदू

रादनसा रथेन । नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ।।६।। यदंग त्वा भरताः
संतरेयुर्गव्यन्ग्राम इषित इंद्रजूतः । अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञिया
नां । अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनां । प्र पिन्वध्वमिषयंतीः सुराधा
आ वक्षणाः पृणध्वं यात शीभं । उद्व ऊर्मिः शम्या हंत्वापो योक्त्राणि मुंचत । मादुष्कृतौ व्येन
साघ्न्यौ शूनमारतां ।।७।। अछ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्यंत पांत्यानुष्टुप् । अछा
वद तवसं गीर्भिराभिस्स्तुहि पर्जन्यं नमसा विवास । कनिक्रदद्वृषभो जीरदानू रेतो दधात्यो
षधीषु गर्भं । वि वृक्षान्हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं महावधात् । उतानागा ईषते ५
वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हंति दुष्कृतः । रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते

वर्ष्याँ अह । दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः । प्र वाता वांति पतयं
ति विद्युत उदोषधीर्जिहते पिन्वते स्वः । इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रे
तसावति । यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति । यस्य व्रत ओषधीर्विश्व
रूपाः स नः पर्जन्य महि शर्म यछ ।।८।। दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धा
राः । अर्वाङेतेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः । अभि क्रंद स्तनय गर्भमा धा उ
दन्वता परि दीया रथेन । दृतिं सुकर्ष विषितं न्यंचं समा भवंतूद्वतो निपादाः । महांतं कोशमु
दचा नि षिंच स्यंदंतां कुल्या विषिताः पुरस्तात् । घृतेन द्यावापृथिवी व्युंधि सुप्रपाणं भव
त्वघ्न्याभ्यः । यत्पर्जन्य कनिक्रदत्स्तनयन्हंसि दुष्कृतः । प्रतीदं विश्वं मोदते यत्किंच पृथिव्या

मधि। अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्येतवाउ। अजीजनओषधीर्भोजनायकमु
तप्रजाभ्योविदोमनीषां॥१०॥ भरद्वाजःसरस्वतीगायत्रीत्रिजगत्यादिजगतीत्रिष्टुबंतं।
इयमददाद्रभसमृणच्युतंदिवोदासंवध्र्यश्वायदाशुषे। याशश्वंतमाचखादावसंपणिं
तातेदात्राणितविषासरस्वती। इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरू
र्मिभिः। पारावतघ्नीमवसेसुवृक्तिभिःसरस्वतीमाविवासेमधीतिभिः। सरस्वतीदेवनिदो
निबर्हयप्रजांविश्वस्यबृसयस्यमायिनः। उतक्षितिभ्योवनीरविंदोविषमेभ्योअस्रवोवा
जिनीवती। प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती। धीनामवित्र्यवतु। यस्त्वादेविसरस्व ६
त्युपब्रूतेधनेहिते। इंद्रंनवृत्रतूर्ये॥५॥ त्वंदेविसरस्वत्यवावाजेषुवाजिनी। रदापू

षेवनःसनिं। उतस्यानःसरस्वतीघोराहिरण्यवर्तनिः। वृत्रघ्नीवष्टिसुष्टुतिं। यस्याअनं
तोअह्रुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरतिरोरुवत्। सानोविश्वाअतिद्विषःस्वसॄरन्याऋ
तावरी। अतन्नहेवसूर्यः। उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा। सरस्वतीस्तोम्याभूत्॥
१०॥ आपप्रुषीपार्थिवान्युरुरजोअंतरिक्षं। सरस्वतीनिदस्पातु। त्रिषधस्थासप्तधातुःपं
चजातावर्धयंती। वाजेवाजेहव्याभूत्। प्रयामहिम्नामहिनासुचेकितेद्युम्नेभिरन्याअप
सामपस्तमा। रथइवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती। सरस्वत्यभिनो
नेषिवस्योमापस्फरीःपयसामानआधक्। जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यरणा
निगन्म॥१४॥ वसिष्ठआपस्त्रिष्टुप्। आपोयंवःप्रथमंदेवयंतइंद्रपानमूर्मिमकृण्वतेळः।

तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमंतं वनेम । तमूर्मिमापो मधुमत्तमं वोपां नपादव
त्वाशुहेमा । यस्मिन्निंद्रो वसुभिर्मादयाते तमश्याम देवयंतो वो अद्य ॥ शतपवित्राः स्वधया
मदंतीर्देवीर्देवानामपि यंति पाथः । ता इंद्रस्य न मिनंति व्रतानि सिंधुभ्यो हव्यं घृतवज्जु
होत ॥ याः सूर्यो रश्मिभिराततान याभ्य इंद्रो अरदद्गातुमूर्मिं । ते सिंधवो वरिवो धातना
नो यूयं॰ दा नः ॥ ४ ॥ वसिष्ठ आपस्त्रिष्टुप् ॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्य
निविशमानाः । इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु ॥ या आपो दिव्या उ
त वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः । समुद्रार्था याः शुचयः पावकास्ता आपो॰ । या
सां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां । मधुश्चुतः शुचयो याः पावका

स्ता आपो॰ ॥ यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदंति । वैश्वानरो यास्वग्नि
प्रविष्टस्ता आपो॰ ॥ ४ ॥ वसिष्ठो वरुणे त्रिष्टुप् ॥ रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रि
या नदीनां । सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥ आत्मा ते वातो रज आ
नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् । अंतर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रि
याणि ॥ परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यंति रोदसी सुमेके । ऋतावानः कवयो य
ज्ञधीराः प्रचेतसो य इषयंत मन्म ॥ उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥ तिस्रो द्यावो निहिता अंतरस्मिं
स्तिस्रो भूमीरुपराः षड्विधानाः । गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंखं हिरण्ययं शुभे कं ॥

अव सिंधुं वरुणो द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान्। गंभीरशंसो रजसो विमानः सुपा
रक्षत्रः सतो अस्य राजा॥ यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः। अनु व्रता
न्यदितेर्ऋधंतो यूयं पा॰ नः॥५॥ प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व। य ई
मर्वांचं करते यजत्रं सहस्रामघं वृषणं बृहंतं। अधा न्वस्य संदृशं जगन्वानग्नेरनीकं व
रुणस्य मंसि। स्वर्यदश्मन्नधिपा उ अंधो भि मा वपुर्दृशये निनीयात्। आ यद्रुहाव वरु
णश्च नावं प्र यत्समुद्रमीरयाव मध्यं। अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कं।
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः। स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु ८
द्यावस्ततनन्यादुषासः। क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित्। बृहंतं

मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते। य आपिर्नित्यो वरुण प्रियः सन्त्वामा
गांसि कृणवत्सखा ते। मा त एनस्वंतो यक्षिन्भुजेम यंधि ष्मा विप्र स्तुवते वरूथं। ध्रु
वासु त्वासु क्षितिषु क्षियंतो व्यस्मत्पाशं वरुणो मुमोचत्। अवो वन्वाना अदिते
रुपस्थाद्यूयं पात॰ नः॥६॥ मो षु वरुण मृन्मयं गृहं राजन्नहं गमं। मृळा सुक्षत्र मृ
ळय। यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा॰ य। क्रत्वः समह दीनता प्र
तीपं जगमा शुचे। मृळा॰ य। अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारं। मृळा॰ य॥
यत्किं चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयो
पिम मा नस्तस्मादेनसो देव रीरिषः॥७॥ वसिष्ठः सरस्वती त्रिष्टुप्। प्र क्षोदसा धा

यसासस्र एषासरस्वतीधरुणमायसीपूः।प्रबाबधानारथ्येवयातिविश्वाअपोमहि
नासिंधुरन्याः।एकाचेतत्सरस्वतीनदीनांशुचिर्यतीगिरिभ्यआसमुद्रात्।रायश्चे
तंतीभुवनस्यभूरेर्घृतंपयोदुदुहेनाहुषाय।सवावृधेनर्योयोषणासुवृषाशिशुर्वृ
षभोयज्ञियासु।सवाजिनंमघवद्भ्योदधातिविसातयेतन्वंमामृजीत।उतस्यानः
सरस्वतीजुषाणोपश्रवत्सुभगायज्ञेअस्मिन्।मितज्ञुभिर्नमस्यैरियानारायायुजा
चिदुत्तरासखिभ्यः।इमाजुह्वानायुष्मदानमोभिःप्रतिस्तोमंसरस्वतीजुषस्वातव
शर्मन्प्रियतमेदधानाउपस्थेयामशरणंनवृक्षं।अयमुतेसरस्वतिवसिष्ठोद्वाराव ९
ऋतस्यसुभगेव्यावः।वर्द्धशुभ्रेस्तुवतेरासिवाजान्यूयंपा॥१८॥वसिष्ठःसरस्वतीप्रगा

थःप्रस्तारपंक्तिःपराग्यास्तिस्रःसरस्वते॥बृहदुगायिषेवचोसुर्यानदीनां।
सरस्वतीमिन्महयासुवृक्तिभिःस्तोमैर्वसिष्ठरोदसी।उभेयत्तेमहिनाशुभ्रेअंध
सीअधिक्षियंतिपूरवः।सानोबोध्यवित्रीमरुत्सखाचोदराधोमघोनां।भद्रमिद्भद्रा
कृणवत्सरस्वत्यकवारीचेततिवाजिनीवती।गृणानाजमदग्निवत्स्तुवानाचवसि
ष्ठवत्।जनीयंतोन्वग्रवःपुत्रीयंतःसुदानवः।सरस्वंतंहवामहे।येतेसरस्वऊर्म
योमधुमंतोघृतश्चुतः।तेभिर्नोविताभव।पीपिवांसंसरस्वतःस्तनंयोविश्वदर्शतः।
भक्षीमहिप्रजामिषं॥यस्यव्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठंतआपः।यस्य
व्रतेपुष्टिपतिर्निविष्टस्तंसरस्वंतमवसेहुवेम॥१९॥तिस्रःषट्पार्जन्यंउपर्जन्या

पद्वं गायत्रमेने कुमार आग्नेयो पश्यद्वसिष्ठ एववा वृष्टिकामः संवत्सरं दश पर्जन्यसूक्ता
नि संहृष्टान्मंडूकांस्तु शवावाद्यानुष्टुप्॥ तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघ
मूधः। स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति। यो वर्धन ओषधीनां
यो अपां यो विश्वस्य जगतो देव ईशे। स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्य
स्मे। स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः। पितुः पयः प्रति गृभ्णाति मा
ता तेन पिता वर्धते तेन पुत्रः। यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रु
रापः। त्रयः कोशास उपसेचनासो मध्वः श्चोतंत्यभितो विरप्शं। इदं वचः पर्जन्याय स्व १०
राजे हृदो अस्त्वंतरं तज्जुजोषत्। मयोभुवो वृष्टयः संत्वस्मे सुपिप्पला ओषधीर्देवगो

पाः। स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च। तन्म ऋतं पातु शतशारदा
य यूयं०नः॥२०॥ पर्जन्याय प्रगायत दिवस्पुत्राय मीढुषे। स नो यवसमिच्छतु। यो गर्भमो
षधीनां गवां कृणोत्यर्वतां। पर्जन्यः पुरुषीणां। तस्मा इदास्ये हविर्जुहोता मधुमत्तमं॥ इ
डां नः संयतं करत्॥२१॥ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां
प्र मंडूका अवादिषुः। दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानं। गवाम
ह न मायुर्वत्सिनीनां मंडूकानां वग्नुरत्रा समेति। यदीमेनां उशतो अभ्यवर्षीत्तृष्यावतः
प्रावृष्यागतायां। अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदंतमेति। अन्यो अन्य
मनु गृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां। मंडूको यदभिवृष्टः कनिष्कन्पृश्निः संपृंक्ते हरि

तेन वाचं। यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः। सर्वं तदेषां समृधेव प
र्व यत्सुवाचो वदथनाध्यप्सु॥२२॥ गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषां। स
मानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः। ब्राह्मणासो अतिरात्रे न सोमे सरो न
पूर्णमभितो वदंतः। संवत्सरस्य तदहः परिष्ठ यन्मंडूकाः प्रावृषीणं बभूव। ब्राह्मणासः सो
मिनो वाचमक्रत ब्रह्म कृण्वंतः परिवत्सरीणं। अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवं
नि गुह्या न केचित्। देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनंत्येते। संवत्सरे प्रावृष्या
गतायां तप्ता घर्मा अश्नुवते विसर्गं। गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसू
नि। गवां मंडूका ददतः शतानि सहस्रसावे प्रतिरंत आयुः। खिलं। उप प्र वद मंडूकि वर्ष

मा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः॥२३॥ निरश्विरिंद्रो नु स्तुषा। एतो न्विंद्रं
स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु। इंद्र शुद्धो न आ गहि शु
द्धः शुद्धाभिरूतिभिः। शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः। इंद्र शुद्धो हि नो रयिं शुद्धो रत्ना
नि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि॥२४॥ मधुछंदाः सोमः पवमानो गाय
त्री॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इंद्राय पातवे सुतः। रक्षोहा विश्वचर्षणिरभि
योनिमयोहतं। द्रुणा सधस्थमासदत्। वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः। पर्षि राधो मघो
नां। अभ्यर्ष महानां देवानां वीतिमंधसा। अभि वाजमुत श्रवः। त्वामच्छा चरामसि तदिदर्थं दि
वे दिवे। इंदो त्वे न आशसः॥२५॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना।

नमीमएवीःसमर्यआगृभ्णंतियोषणोदश॥अवसारःपार्थेदिवि।नमीहिन्वंत्यद्रयोधमंनिवा
सुरंहतिं।त्रिधातुवारणंमधु।अभीश्ममघ्न्याउतश्रीणंतिधेनवःशिशुं।सोममिंद्रायपातवे॥
अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्नते।शूरोमघाचमंहते॥२८॥अवत्सारःसोमःपवमानो
गायत्री॥नरसमंदीधावतिधारासुतस्यांधसः।नरसमंदीधावति।उस्रावेदवसूनांमर्तस्य
देव्यवसः।नर॰ति।ध्वस्त्रयोःपुरुषंत्योरासहस्राणिदद्महे।नर॰ति।आययोस्त्रिंशतंतना
सहस्राणिचदद्महे।नर॰ति॥२९॥अवत्सारःसोमःपवमानोनुष्टुप्॥यःपावमानीरध्येत्यृ
षिभिःसंभृतंरसं।सर्वंसपूतमश्नातिस्वदितंमातरिश्वना।पावमानीर्योअध्येत्यृषिभिःसंभृ १२
तंरसं।तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं॥३२॥सिंधुद्वीपआपोगायत्र्यंतेद्वेअनुष्टुभौ।
आपोहिष्ठामयोभुवः॰त्रक्र्ए॥देवश्रवाःसरस्वतीरापत्रिष्टुप्॥सरस्वतींदेवयंतोहवंतेस
सरस्वतीमध्वरेतायमाने।सरस्वतींसुकृतोअह्वयंतसरस्वतीदाशुषेवार्यंदात्॥सरस्व
तियासरथंययाथस्वधाभिर्देविपितृभिर्मदंति।आसद्यास्मिन्बर्हिषिमादयस्वानमी
वाइषआधेह्यस्मे।सरस्वतींयांपितरोहवंतेदक्षिणायज्ञमभिनक्षमाणाः।सहस्रार्घ
मिळोअत्रभागंरायस्पोषंयजमानेषुधेहि।आपोअस्मान्मातरःशुंधयंतुघृतेननो
घृतप्वःपुनंतु।विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि॥२८॥कवषऐ
लूषअपोनपाद्वात्रिष्टुप्॥प्रदेवत्राब्रह्मणेगातुरेत्वपोअच्छामनसोनप्रयुक्ति।महीं
मित्रस्यवरुणस्यधासिंपृथुज्रयसेरीरधासुवृक्तिं।अध्वर्यवोहविष्मंतोहिभूताच्छाप

इतोशतीरुशंतः।अवयाश्चष्टेअरुणःसुपर्णःस्तमास्यध्वमूर्मिमद्यासुहस्ताः।अध्वर्य
वोऽपइतासमुद्रमपांनपातंहविषायजध्वं।सवोददूर्मिमद्यासुपूतंतस्मैसोमंमधु
मंतंसुनोत।योअनिध्मोदीदयदप्स्वंतर्यंविप्रासईळतेअध्वरेषु।अपांनपान्मधुमती
रपोदायाभिरिंद्रोवावृधेवीर्याय।याभिःसोमोमोदतेहर्षतेचकल्याणीभिर्युवतिभिर्न
मर्यः।ताअध्वर्योअपोअछापरेहियदासिंचाओषधीभिःपुनीतान्॥२९॥एवेद्यूनेयुव
तयोनमंतयदीमुशंनुशतीरेत्यछ।संजानतेमनसासंचिकित्रेऽध्वर्यवोधिषणापश्चदेवीः
।योवोवृताभ्योअकृणोदुलोकंयोवोमह्याअभिशस्तेरमुंचत्।तस्माइंद्रायमधुमंतमू १२
र्मिंदेवमादनंप्रहिणोतनापः।प्रास्मैहिनोतमधुमंतमूर्मिंगर्भोयोवःसिंधवोमध्वउ

त्सः।घृतपृष्ठमीड्यमध्वरेष्वापोरेवतीःशृणुताहवंमे।तेसिंधवोमत्सरमिंद्रपानमूर्मिंप्र
हेनयउभेइयर्ति।मदच्युतमौशानंनभोजांपरित्रितंतुंविचरंतमुत्सं।आवर्वृततीर
धनुद्विधारागोषुयुधोननियवंचरंतीः।ऋषेजनित्रीर्भुवनस्यपत्नीरपोवंदस्वसवृधः
सयोनीः॥३०॥हिनोतानोअध्वरंदेवयज्याहिनोतब्रह्मसनयेधनानां।ऋतस्ययोगेवि
ष्यध्वमूधःश्रुष्टीवरीर्भूतनास्मभ्यमापः।आपोरेवतीःक्षयथाहिवस्वःक्रतुंचभद्रंबिभृथा
मृतंच।रायश्चस्थःस्वपत्यस्यपत्नीःसरस्वतीतद्गृणतेवयोधात्।प्रतियदापोअदृश्रमाय
तीर्घृतंपयांसिबिभ्रतीर्मधूनि।अध्वर्युभिर्मनसासंविदानाइंद्रायसोमंसुषुतंभरंतीः॥
एमाअग्मन्रेवतीर्जीवधन्याअध्वर्यवःसादयतासखायः।निबर्हिषिधत्तनसोम्यासो

पां न ग्रामं विदानास एनाः। आग्मेनाप उशतीर्बर्हिरेदं न्यध्वरे असदं देवयंतीः। अध्वर्य
वः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या॥ १५॥ सिंधुक्षिं नद्यो जगती। प्र सु व
आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः। प्र सप्त सप्त त्रेधा हि चक्रमुः प्र
सृत्वरीणामति सिंधुरोजसा। प्र तेरदद्वरुणो यातवे पथः सिंधो यद्वाजां अभ्यद्रवस्त्वं। भू
म्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि। दिवि स्वनो यतते भूम्यो
पर्यनंतं शुष्ममुदियर्ति भानुना। अभ्रादिव प्र स्तनयंति वृष्टयः सिंधुर्यदेति वृषभो
न रोरुवत्। अभि त्वा सिंधो शिशुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः। राजेव यु १७
ध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि। इमं मे गंगे यमुने सरस्वति शु

तुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया।
सितासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति। ये वै तन्वं विसृजंति धीरास्ते ज
नासो अमृतं भजंते॥ १२॥ तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या। त्वं सिं
धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे। ऋजीत्येनी रुशती महित्वा परि ज्रयां
सि भरते रजांसि। अदब्धा सिंधुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता। स्वश्वा सिंधुः
सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती। ऊर्णावती युवतिः सीलमावत्युताधि वस्ते
सुभगा मधुवृधं। सुखं रथं युयुजे सिंधुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ। महान्ह्यस्य
महिमा पनस्यते दब्धस्य स्वयशसो विरप्शिनः॥ ९॥ बृहस्पते द्वादशार्ष्टिषेणो देवापिस्त्रिष्टु

कामोदेवांॠक्षशाव॥वृहस्पतेप्रतिमेदेवतामिहिमित्रोवायद्वरुणोवासिपूषा।आदित्यै
र्वायद्वसुभिर्मरुत्वांसपर्जन्यंशंतनवेवृषाय।आदेवोदूतोअजिरश्चिकित्वांत्वद्देवापे
अभिमामगछत्।प्रतीचीनःप्रतिमामाववृत्स्वदधामितेद्युमतींवाचमासन्।अस्मेधेहि
द्युमतींवाचमासन्वृहस्पतेअनमीवामिषिरां।ययावृष्टिंशंतनवेवनावदिवोद्रप्सोम
धुमाँआविवेश।आनोद्रप्सामधुमंतोविशंत्विंद्रदेह्यधिरथंसहस्रं।निषीदहोत्रमृतुथा
यजस्वदेवान्देवापेहविषासपर्य।आर्ष्टिषेणोहोत्रमृषिर्निषीदंदेवापिर्देवसुमतिंचिकित्वा
न्।सउत्तरस्मादधरंसमुद्रमपोदिव्याअसृजद्वर्ष्याअभि।अस्मिन्समुद्रेअध्युत्तरस्मि १५
न्नापोदेवेभिर्निवृताअतिष्ठन्।ताअद्रवन्नार्ष्टिषेणेनसृष्टादेवापिनाप्रेषितामृक्षिणीषु।

॥३४॥यद्देवापिःशंतनवेपुरोहितोहोत्रायवृतःकृपयन्नदीधेत्।देवश्रुतंवृष्टिवनिंरराणो
वृहस्पतिर्वाचमस्माअयछत्।यंत्वादेवापिःशुशुचानोअग्नआर्ष्टिषेणोमनुष्यःसमीधे॥
विश्वेभिर्देवैरनुमद्यमानःप्रपर्जन्यमीरयावृष्टिमंतं।त्वांपूर्वऋषयोगीर्भिरायंत्वामध्वरेषु
पुरुहूतविश्वे।सहस्राण्यधिरथान्यस्मेआनोयज्ञंरोहिदश्वोपयाहि।एतान्यग्नेनवतिर्नव
त्वेआहुतान्यधिरथासहस्रा।तेभिर्वर्धस्वतन्वःशूरपूर्वीर्दिवोनोवृष्टिमिषितोरिरीहि।ए
तान्यग्नेनवतिंसहस्रासंप्रयछवृष्णइंद्रायभागं।विद्वान्पथऋतुशोदेवयानामप्यौलानंदि
विदेवेषुधेहि।अग्नेबाधस्वविमृधोविदुर्गहापामीवामपरक्षांसिसेध।अस्मात्समुद्राद्बृह
तोदिवोनोपांभूमानमुपनःसृजेह॥३५॥एकर्चाःसप्तऋषयोविश्वेदेवानुष्टुप्।उत्तदे

वाअवहितं देवा उन्नयथा पुनः। उ नागश्चकुषं देवा देवा जीवयथा पुनः। द्वाविमौ वातौ वा
त आ सिंधोरा परावतः। दक्षं ते अन्य आवातु परान्यो वातु यद्रपः। आ वात वाहि भेषजं वि
वात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे। आ त्वागमं शंतातिभिरथो अरिष्ट
तातिभिः। दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते। त्रायंतामिह देवास्त्रायतां मरुतां गणः।
त्रायंतां विश्वा भूतानि यथायमरपा असत्। आप इद्वा उ भेषजीरापो अमीवचातनीः। आ
पः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं। हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी। अ
नामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि॥२६॥ ॥अथेत्यादि प्रयोगः॥ ऋषितर्पणप्रारं १६
भनिमित्तं मम अदत्तादानं। अविहितहिंसा। परदारोपसेवा। अनृतं पैशून्यं। असंबद्ध

प्रलापः। परद्रव्याभिलाषः। मनोनिष्टाध्यवसाय। अयाज्ययाजनं। अभोज्यभोजनं। अ
प्रतिग्राह्यप्रतिग्रहः। अगम्यागमनं। पारुष्यमिति त्रयोदश। विधिपापक्षयार्थं आत्मपा
पक्षयार्थं आत्मश्रेयसे मातापित्रोः श्रेयसे अस्मिन् अमुकतीर्थे स्नानमहं करिष्ये॥ ॥
शुनःशेपो वरुणस्त्रिष्टुप्। उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय। अथा व
यमादित्य व्रते तवानागसो अदितये स्याम। वरुणायार्घं दद्यात्। जलमध्ये प्रविश्य निमृ
ज्य। अघमर्षणो भाववृत्तोनुष्टुप्। ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत। ततोरा॰ मघोस्वः।
मेधातिथिर्विष्णुर्गायत्री। तद्विष्णोः परमं पदं सदा पश्यंति सूरयः। दिवीव चक्षुराततं। वसि
ष्ठो वरुणो जगती। यत्किंचेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि। अचित्तीयत्तव

धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥ मेधातिथिरग्निर्गायत्री॥ आग्ना अग्न इ
हावसे होत्रां यविष्ठ भारती॥ वरूत्रीं धिषणां वह॥ दीर्घतमा अग्निर्जगती॥ अश्वीवासं परिमात
रिहन्नह उविच्येभिः सत्वभियाति विज्रयः। वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते व
र्तनीरह॥ अगस्त्य इंद्रस्त्रिष्टुप्॥ अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिंद्र सोमः।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह॥ श्यावाश्वो मरुद्बृहती॥ अग्नि
यामनि दः स्तिरः स्व स्निभिर्दिव्या वद्यमराती॥ विष्णुः शंयोरापश्च त्रिभेषजं स्याम मरुतः स
ह॥ वसिष्ठोऽग्निर्गायत्री॥ अग्ने रक्षाणो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह॥ व १७
सिष्ठोऽग्निस्त्रिष्टुप्॥ अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां। उत द्वार उ

शतीर्विश्रयंतामुत देवाँ उशत आ वहेह॥ वसिष्ठ इंद्रस्त्रिष्टुप्॥ अद्या मुरीय यदि यातुधा
नो अस्मि यदि वायुस्ततप पूरुषस्य। अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधा
नेत्याह॥ विरूपोऽग्निर्गायत्री॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादि
ह॥ देवापिर्वृष्टिकामस्त्रिष्टुप्॥ अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध। अ
स्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह॥ स्नानं॥ इदं विष्णुरिति मेधातिथिर्वि
ष्णुर्गायत्री॥ इदं विष्णुः स्मरेत्। इदमापः प्र वहत० ऋचे॥ ऋक॥३॥ बर्हिरुत्तीर्य महाव्याहृति
भिराचमनं॥ ततः द्विराचमनं। श्रोत्र वंदनं। ततः स्नानांग तर्पणं॥ धौते वासी परिधायमथ्या
ह्न संध्या तर्पणं कुर्यात्॥ ऋषीणां प्रतिष्ठा पूजा धूपदीपनैवेद्यं नमस्कारां कृत्वा फलादि

कं सप्तऋषिमंत्रेण इन्द्रांस्तत्वा। पुण्याहं दीर्घमायुरस्तु। स्नानादास्यमानं ब्राह्मण भोजनं
भरद्वाजादिसप्तऋषिभ्यो वः स्वाहा। अशक्तश्चेद्दक्षिणामात्रं। अस्य सप्तऋषिपूजनकर्म
णो मस्तु। नमस्कारः उद्धाय॥ ॥—॥ प्रस्कण्वः सूर्यो गायत्री। उदुत्यंजातवेदसं०षने
रद्यं॥ वर्गः२॥ वसिष्ठः सूर्यः पुरउष्णिक्॥ तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं
जीवेम शरदः शतं॥ १॥ धुराः सविता त्रिष्टुप्॥ सविता पश्चात्तात् सविता पुरस्तात् सवितोत्तरात्ता
त् सविताधरात्तात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः॥ २॥ कुत्सः सू
र्यस्त्रिष्टुप्। चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी १८
अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च। सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति

पश्चात्। यत्रा नरो देवयंतो युगानि वितन्वते प्रति भद्राय भद्रं। भद्रा अश्वा हरितः सूर्यस्य
चित्रा एतग्वा अनुमाद्यासः। नमस्यंतो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यंति सद्यः॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार। यदेदयुक्त हरितः सधस्थादा
द्रात्री वासस्तनुते सिमस्मै। तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे। अ
नंतमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरंति। अद्या देवा उदिता सूर्यस्य निरंहसः
पिपृता निरवद्यात्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ अत्रि
भिंतपाः सूर्यो जगती दशमी त्रिष्टुप्। नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं स
पर्यत। दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत। सा मा सत्योक्तिः परि पातु

विश्वतोद्यावाचयत्रनननन्नहानिच।निश्वमन्यंनिविशतेयदेजतिविश्वाहापोविश्वाहोदे
तिसूर्यः।ननेअदेवःप्रदिवोनिवासतेयदेतशोभिःपतरैरथर्यसि।प्राचीनमन्यदनुवर्तते
रजउदन्येनज्योतिषायासिसूर्य।येनसूर्यज्योतिषाबाधसेतमोजगच्चविश्वमुदियर्षि
भानुना।नेनास्मद्विश्वामनिरामपाकुतिमपामीवामपदुष्वप्न्यंसुव।विश्वस्यहिप्रेषि
तोरक्षसिव्रतमहेळयन्नुच्चरसिस्वधाअनु।यदद्यत्वासूर्योपब्रवामहेतंनोदेवाअनु
मंसीरतक्रतुं।तन्नोद्यावापृथिवीतन्नआपइंद्रःशृण्वंतुमरुतोहवंवचः।माशूनेभूम
सूर्यस्यसंदृशिभद्रंजीवंतोजरणामशीमहि॥४॥विश्वाहात्वासुमनसःसुचक्षसःप्र १९
जावंतोअनमीवाअनागसः।उद्यंतंत्वामित्रमहोदिवेदिवेज्योग्जीवाःप्रतिपश्येमसूर्य।

महिज्योतिर्बिभ्रतंत्वाविचक्षणभास्वंतंचक्षुषेचक्षुषेमयः।आरोहंतंवृहतःपाजस
स्परिवयंजीवाःप्रतिपश्येमसूर्य।यस्यतेविश्वाभुवनानिकेतुनाप्रचेरतेनिचविशंतेअ
क्तुभिः।अनागास्त्वेनहरिकेशसूर्याह्नाह्नानोवस्यसावस्यसोदिहि।शंनोभवचक्षसा
शंनोअह्नाशंभानुनाशंहिमाशंघृणेन।यथाशमध्वंछमसद्दुरोणेतत्सूर्यद्रविणंधेहि
चित्रं।अस्माकंदेवाउभयायजन्मनेशर्मयच्छतद्विपदेचतुष्पदे।अदत्पिबदूर्जयमा
नमाशितंतदस्मेशंयोररपोदधातन।यद्वोदेवाश्चकृमाजिह्वयागुरुमनसोवाप्रयुती
देवहेळनं।अरावायोनोअभिदुच्छुनायतेतस्मिंतदेनोवसवोनिधेतन॥५॥चक्षुःसूर्यो
गायत्री।सूर्योनोदिवस्पातुवातोअंतरिक्षात्।अग्निर्नःपार्थिवेभ्यः।जोषासवितर्यस्य

नेहरः शातंस वाँ अर्हति। पाहि नो दिद्युतः पतंत्याः॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः।
चक्षुर्धाता दधातु नः॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम॥ सुसंदृ
शं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः॥६॥ शास इत्थानुष्टुप्॥ शास इत्था महाँ
असि अमित्रखादो अद्भुतः। न यस्य हन्यते सखा न जीयते कदाचन॥ स्वस्तिदा विशस्पति
र्वृत्रहा विमृधो वशी। वृषेंद्रः पुर एतु नः सोमपा अभयंकरः॥ वि रक्षो वि मृधो जहि वि वृ
त्रस्य हनू रुज। वि मन्युमिंद्र वृत्रहन्नमित्रस्याभिदासतः॥ वि न इंद्र मृधो जहि नीचा य
च्छ पृतन्यतः॥ यो अस्माँ अभिदासत्यधरं गमया तमः॥ अपेंद्र द्विषतो मनोप जिज्यास २०
तो वधं॥ वि मन्योः शर्म यच्छ वरीयो यवया वधं॥७॥ आचमनं॥ अपसव्यं त

त्वा॥ वामं जानु निपातयित्वा॥ ...पुण दर्भान् तिलान् गृहीत्वा॥ ऋषीणां तर्पणं कुर्यात्॥ ॥
श्रद्धा श्रद्धानुष्टुप्॥ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि वचसा वेद
यामसि॥ प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥ यथा
देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृधि॥ श्रद्धां देवा य
जमाना वायुगोपा उपासते। श्रद्धां हृदय्ययाकूत्या श्रद्धया विंदते वसु॥ श्रद्धां प्रातर्हवाम
हे श्रद्धां मध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः॥८॥ वरुण इंद्रो नुष्टुप्॥
मेधां मह्यमंगिरसो मेधां सप्तऋषयो द...॥ मेधामिंद्रश्चाग्निश्च मेधां धाता दधातु मे॥ मेधां
मे वरुणो राजा मेधां देवी सरस्वती॥ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजा॥ या मेधाऽ

म्परसुगंधर्वेषुचयन्मम। दैवीयामानुषी रेषासामायाविशतादिमं। यन्मेनोक्तंनद्रवतां
शाकेयंयदनुद्रवे। निशामहंनिशामहैपिच ब्रतंसहप्रियेण भूयासंब्रह्मणसंगमेमदि।
शरीरंमेविचक्षणंवाङ्मेमधुमदुहा। इदमहमसौसूर्यंब्रह्मणानीस्थःस्कनंमेमाप्र
हासीत्॥ मेधांदेवींमनसारेजमाना गंधर्वजुष्टांप्रतिनोजुषस्व। मह्यंमेधांवदमह्यं
श्रियंवदमेधावीभूयासमजिराजरिस्ला। सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं। सनिंमे
धामयासिषं। यांमेधांदेवगणाःपितरश्चोपासते। तयामामद्यमेधयाग्नेमेधाविनंकुरु।
मेधाव्यहंसुमनाःसुप्रतीकः श्रद्धामनाः सत्यमुपःसुशेवः। महायशाधारयिष्णुःप्रवक्ता २३
भूयासमर्येस्वधयाप्रयोगे॥ घर्गोधाघोषाविश्ववारापालोपनिषन्निषत्॥ ब्रह्मजाया